Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SISRRJ | Volume 1 | Issue 2 | ISSN : 2581- 6306

# वाल्मीकीयरामायणे केचन दार्शनिक शब्दा:



**डॉ० नवनीता**
**A-21, बैंकमेन्स कॉलोनी,**
**चित्रगुप्तनगर, कंकरबाग**
**पटना, बिहार, भारत**

**सारांश-** महाकवि वाल्मीकिविरचितं रामायणं संस्कृतभाषाया: प्रथमं काव्यं वर्तते। रामायणे यत्र–तत्र अनेकानि दार्शनिकानि तत्वानि प्राप्यन्ते। अत्र न्याय–सांख्य–वैशेषिक–तर्कविद्यादीनां अनेकेषु कथाप्रसंगेषु चर्चा उपलभ्यते। रामायणे नास्तिकसिद्धान्तस्य खण्डनम् तर्केण कृतम्। रामायणे निहितं दार्शनिकसिद्धान्तबीजं कालान्तरे दार्शनिकग्रन्थेषु वृक्षरूपेण विकसितम्।

**प्रमुखशब्द**: - वाल्मीकि:, रामायणम्, आदिकाव्यम्, न्याय:, सांख्यम्, तर्कविद्या, दर्शनम्, आन्वीक्षिकी इत्यादि।

---

वाल्मीकीयं रामायणं संस्कृतभाषाया: प्रथमं काव्यं वर्तते। अनेनैव अस्य रचयिता वाल्मीकि: आदिकवि: तत्कृतिश्च आदिकाव्यमिति प्रसिद्धमस्ति। काव्यमर्यादया यद्यपि साहित्यिकं सौन्दर्यं सर्वत्र प्रसृतं लभ्यते तथापि यत्र–यत्र संवादेषु दार्शनिकानि तत्त्वान्यपि प्रकाशितानि कविना इति न सन्देह:। वस्तुत: कविकर्म सकलशास्त्रावगाहि भवतीति भामह: स्वकाव्यालंकारे कथयति–

**न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।**

**जायते यन्न काव्यांगमहोभारो महान् कवे:॥**

अनेन क्रमेण रामायणेऽपि प्रसंगानुसारेण नाना विषया: शास्त्राणि च निर्दिष्टानि लभ्यन्ते। तथापि नेदं शास्त्रकाव्यमिति स्वीकर्त्तव्यं भट्टिकाव्यादिवत्। भारतीयदर्शने पदार्थविवेचनानि प्रसिद्धानि सन्ति। तेषु पदार्थेषु पंचभूतानि प्रसिद्धानि सन्ति रामायणस्य युद्धकाण्डे सेतुनिर्माणप्रसंगे रामस्य कोपं परिलक्ष्य क्षुब्ध: सागर: प्रत्यक्षीभूत: कथयति–

**पृथिवी वायु आकाशभाषो ज्योतिश्च राघव।**

**स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिता:॥**[1]

अर्थात् पृथ्वी, वायु:, आकाश:, जलं, तेज: इति पंचभूतानि सर्वदा स्वभावे एव तिष्ठन्ति। अर्थात् कदापि स्वकीयं निर्धारितं सनातनं मार्गं न परित्यजन्ति। अत्र मार्ग–शब्देन वैशेषिकदर्शनोक्ता: पदार्थधर्मा: एव ज्ञायन्ते।

यद्यपि अत्र जलरूपस्य एव सागरस्य प्रसंग: वर्तते तथापि अनुषंगत: सर्वाणि पञ्चभूतानि उल्लिखितानि। जलस्य स्वरूपं तरलं भवति, सागरस्य अगाध: जड़पदार्थ: इति यावत्। पञ्चभूतानि संसारं रचयन्ति इति सामान्या दार्शनिकी स्थिति:। वेदान्तदर्शने पञ्चीकरणेन जगदुत्पत्ति: निरूपिता वर्तते। जलरूपस्य सागरस्य अगाधत्वं प्रकृति: वर्तते। यदि सागर: गाधोभवेत् तदा स्वभाव व्यतिक्रम: अर्थात् विकृति: जायेत। अतएव सागर: पञ्चभूतानां प्राकृतिकधर्माणां निर्देशं करोति।

यदि कश्चित् पदार्थ: अपरपदार्थधर्मान् धारयेत् तदा विकृति: अर्थात् गुणसंक्षोभ: भवेत्। यद्यपि अत्र रामायणे सांख्यदर्शनस्य विकृतितत्वस्य साक्षात् निर्देशो नास्ति किन्तु परोक्षत: ज्ञायते यत् जलं स्वकीयं धर्मं जहाति चेत् विकृतिरेव स्यात्। अयं निष्कर्ष: सामान्यत: पदार्थानां स्वभावे तिष्ठन्ति; परञ्च विशेषस्थितावेव तेषां विकारो जायते।

साम्प्रतं रामायणस्य केचन दार्शनिकशब्दा: विविच्यन्ते। दार्शनिकविवेचनेषु यत्र कस्यापि वस्तुन: युक्तौ वा असंगति: लभ्यते तत् 'अनुपपन्नम्' इति कथ्यते। तनैव सम्बद्ध: शब्दा: अनुपपत्ति: इति। अनयो: शब्दयो: प्रयोग: विवादस्थलेषु जायते यत्र वादी प्रतिवादिन: युक्तौ वचने वा दोषं दर्शयति। रामानुजाचार्य: शंकराचार्य: मायाखण्डने सप्त-अनुपपत्ती: दर्शयति ब्रह्मजिज्ञासासूत्रभाष्ये।[2] वैयाकरणाश्च निपातनस्य लक्षणे कथयन्ति शास्त्रेषु अनुपपन्नं पदं येनोपपद्यते तन्निपातनम्। निरुक्ते च वेदमन्त्राणां सार्थकताविचारे पूर्वपक्षीया युक्ति: प्रदर्शिता। कौत्सकृता-अथापि (वेदमन्त्रा:) अनुपपन्नार्था: भवन्ति यथा ओषधे त्रायस्वैनम्।[3]

वाल्मीकीयरामायणे विशुद्धशास्त्रीयविवेचने एव अनुपपन्नशब्दस्य प्रयोग: दृश्यते। महोदरोनाम राक्षस: कुम्भकर्णं कथयति-

**एकस्यैवाभियाने तु हेतुर्य: कथितस्त्वया।**

**तत्राप्यनुपपन्नं ते वक्ष्यामि यदसाधु च ॥**[4]

हे कुम्भकर्ण! त्वया एकाकी एव अभियानस्य प्रस्तावं पुरस्कृत्य यो हेतुः प्रस्तावित: स: सर्वथा अनुपपन्न: असिद्धौ वा हेतु:। तदन्नतरं महोदर: कुम्भकर्णस्य हेतौ अनुपपत्ति दर्शितवान्। एतेन सिद्ध्यति यत् रामायणयुगे राजनीतिविषये दर्शनविषये च वादा: (शास्त्रार्था:) प्रचलन्ति स्म यत्र खण्डन-मण्डनयो: प्रक्रिया जायते। स्ववक्तव्यसिद्धौ हेतव: प्रस्तूयन्ते। हेतूना च दोषा: अनुपपत्तय: प्रदर्श्यन्ते स्म। एक: पुरुष: अपरस्य वचनानि खण्डयन् तत्र युक्तौ अनुपपत्तिं दर्शययति।

अपरत्र उपपन्न शब्दस्य प्रयोग: युक्तिसंगत इत्यर्थे दृश्यते। यथा अयोध्याकाण्डे अनसूया सीता संवादे अनसूया सीताया: वचनस्य संगतत्त्वं दर्शयन्ती कथयति-

**उपपन्नं च युक्तं च वचनं तव मैथिलि।**[5]

अत्र उपपन्नं सिद्धमित्यर्थ: युक्तञ्च युक्तिसंगतम् इति एवमेव पदार्थस्य वचनस्य ग्राह्यत्वे उपपन्नं युक्तम् इति वा प्रयुज्यते।

अपरत्रापि सुन्दरकान्डे यदा हुनमान् अशोकवाटिकायां दु:खसंतप्तानां सुन्दरीं काञ्चन् नारीं पश्यति तदा विभिन्नाभि: युक्तिभि: साधकै: कारणैश्च तर्कं कृतवान यत् सा एव सीता वर्तते। कवि: वाल्मीकि: कथयति तर्कयामास सीतेति कारणैरुपपादिभि:।[6]

तर्क: इति न्यायशास्त्रीय: शब्द:। व्याप्यारोपेण व्यापकारोप: तर्क: इति लक्षमणस्य। यथा यदि पर्वते वह्नि: न स्यात् तर्हि तत्र धूमोऽपि न स्यात्। एवमेव हनुमत: तर्क: यत् यदि सा सीता न स्यात् तदा तानि-तानि लक्षणानि न भवेयु: अतएव तर्कयामास सीतेति। विभिन्नै: उपपादकै: उपपत्तिविधायकै: कारणै: एतस्य विश्वास्य सिद्धि: जाता। वाल्मीकिरामायणे आन्वीक्षिक्या: तर्कविद्याया: प्रक्रिया प्रवर्तमाना लभ्यते।

अपर: शब्द: न्याय: इति। अयं शब्द: शास्त्रविशेषे, प्रणाल्यां समानतायाञ्च वर्तते। किन्तु मुख्यत: शास्त्रविशेषे एव अस्य प्रायिक: प्रयोग:। न्यायभाष्यकार: वात्स्यायन: कथयति यत् प्रमाणैरर्थपरीक्षणं न्याय: इति।[7] वाल्मीकि: न्यायशब्दस्य प्रयोगं शास्त्रविशेषार्थे करोति। अरण्यकाण्डे जटायु: सीताहरणाय समुद्यतं रावणं दृष्ट्वा कथयति-

**न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यत:।**

**हेतुभिन्नार्ययसंयुक्तैर्ध्रुवां वेदश्रुतिमिव॥[8]**

अनेन वाक्येन सिध्यति यत् केचन नास्तिका: ध्रुवां वेदमातरं हर्तुं वाञ्छन्ति स्म अर्थात् स्वैरवृत्या वेदार्थं कुर्वन्त: वेदहरणवृत्तयोऽभवन्। किन्तु न्यायसंयुक्तै: हेतुभि: ध्रुवाया: श्रुते: रक्षा भवति स्म। एवमेव जटायुषा रक्षिताया: सीताया: हरणम् असम्भवम्।

वाल्मीकि: स्वकीये महाकाव्ये यत्र-तत्र न्यायादिशास्त्राणां शब्दानां प्रयोगेण वाञ्छितार्थं दृढतया प्रतिपादयति किन्तु कदापि तानि शास्त्रीयपदानि काव्यरसास्वादे कथानकप्रवर्तने च बाधकानि न भवन्ति।

अनेन प्रकारेण ज्ञायते यत् कवि: वाल्मीकि: दार्शनिक: अपि आसीत्। रामायणे प्रयुक्ता: दार्शनिकशब्दा: कालान्तरे विविधदर्शनग्रन्थेषु विस्तरेण व्याख्याता: इति रामायणदार्शनिकग्रन्थानां पर्यालोचनेन सिद्ध्यते।

**सन्दर्भ ग्रन्थ:-**


1. वाल्मीकीयरामायणम् (6.22.25)
2. भारतीय दर्शनम् (डॉ. उमेश मिश्रकृतम्), पृ. 594-6
3. यस्ककृतं निरक्तम्-1.15
4. वाल्मीकी रामायणम्
5. रामायण- 2.118.15
6. रामायण- 5.15.25
7. न्यायसूत्रभाष्य- 1.1.1
8. वाल्मीकीय रामायण 3.50.21